## विभाषोपपदेन प्रतीयमाने। (७७/२७४४)

'स्वरितञितः' (१.३.७२/२३५८) [1]इति पञ्चभिः सूत्रैरात्मनेपदं कर्त्रभिप्राये क्रियाफले [2]द्योतिते विहितम्। [3]तदुपपदेन द्योतिते न प्राप्नोति इति [4]वचनमारभ्यते। समीपे श्रूयमाणं शब्दान्तरमुपपदम्। तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषा आत्मनेपदं भवति। स्वं यज्ञं यजते, [5]स्वं यज्ञं यजति। स्वं कटं कुरुते, [6]स्वं कटं करोति। स्वं पुत्रमपवदते, स्वं पुत्रमपवदति। एवं [7]पञ्चसूत्र्यामुदाहार्यम्॥

## शेषात् कर्तरि परस्मैपदम्। (७८/२१५९)

पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः, न [8]परस्मैपदनियमः। तत् सर्वतः प्राप्नोति, तदर्थमिदमुच्यते। येभ्यो धातुभ्यो [9]येन विशेषणेनात्मनेपदमुक्तं[10] [11]ततो यदन्यत् स शेषः। शेषात् कर्तरि परस्मैपदं भवति। शेषादेव नान्यस्मात्। अनुदात्तङित आत्मनेपदम् (१.३.१२/२१५७) उक्तम्—आस्ते। शेते। ततोऽन्यत्र परस्मैपदं भवति—याति। [12]वाति। [13]नेर्विशः (१.३.१७/२६८३) आत्मनेपदमुक्तम्—[14]निविशते। ततोऽन्यत्र परस्मैपदम्—आविशति। प्रविशति। कर्तरि इति किम्? [15]पच्यते। गम्यते। कर्मकर्तरि [16]कस्मात् परस्मैपदं न भवति, पच्यते [17]ओदनः स्वयमेव[18]? 'कर्तरि कर्मव्यतिहारे' (१.३.१४/२६८०) [19]इति द्वितीयं कर्तृग्रहणमनुवर्तते, तेन कर्तैव यः कर्ता (म. भा. १.२९२) तत्र परस्मैपदं [20]भवति, कर्मकर्तरि न भवति[21]॥

## अनुपराभ्यां कृञः। (७९/२७४५)

कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं [22]विहितम्। तदपवादः [23]परस्मैपदं विधीयते। अनु परा इत्येवंपूर्वात् करोतेः परस्मैपदं भवति। अनुकरोति। [24]पराकरोति॥

## अभिप्रत्यतिभ्यः क्षिपः। (८०/२७४६)

'क्षिप प्रेरणे' (धा. पा. १२८६) स्वरितेत्। [25]ततः कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। अभि प्रति अति इत्येवंपूर्वात् क्षिपः परस्मैपदं भवति। अभिक्षिपति। प्रतिक्षिपति। अतिक्षिपति। अभिप्रत्यतिभ्यः इति किम्? आक्षिपते। द्वितीयमपि कर्तृग्रहणमनुवर्तते, तेनेह न भवति, अभिक्षिप्यते स्वयमेव॥

---

1. इत्यादिभिः अ. 2. द्योत्ये फ. ह. 3. तदपवादेन फ. 4. इदं इत्यधिकम् अ. क. फ. ह. 5. स्वं नास्ति अ. 6. स्वं नास्ति फ. 7. सूत्र्यामपि अ. 8. परस्मैपदं नियतमतः सर्वत्र फ. ह. 9. येन येन क. 10. विहितम् क. 11. ततोऽन्यः शेषः क, अतो यदन्यः अ, शेषः नास्ति ब. 12. श्राति फ. 13. निपूर्वात्-विशः क. फ. 14. निविशते नास्ति फ. 15. पठ्यते फ. पमं. 16. कस्मात् नास्ति अ. ड. फ. 17. ओदनः नास्ति फ. 18. इति इत्यधिकम् क. फ. 19. अतः फ. 20. भवति नास्ति ब. ड. इ. ग. ह. 21. इति इत्यधिकम् ह. 22. उक्तं क. फ. 23. परस्मैपदे ब. ह. ई. 24. पराकरोति नास्ति अ. 25. अतः ब, ततः नास्ति क.